वैयाकरणभूषणसारः

Author - कौण्डभट्ट

F. 3

२०१

१८८

श्रीगणेशायनमः॥ श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणं॥ स्फोटरूपं यतः सर्वं जगदेतद्विवर्त्तते॥१॥ अशेषफलदातारं भवाब्धितरणेत
रिं॥ शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणं॥२॥ पाणिन्यादिमुनीन्प्रणम्य पितरं रंगोजिभट्टाभिधं हृद्ध्वांतनिवारणादिफलिकां सुभाव
वाग्देवतां॥ ढुंढिं गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान् सिद्धान्तानुपपत्तिभिः प्रकटये तेषां वचो दूषये॥३॥ प्रारिप्सितप्रतिबंध
कोपशमनाय कृतं श्रीफणिस्मरणरूपं मंगलं शिष्यशिक्षार्थं निबध्नन्चिकीर्षितं प्रतिजानीते॥ फणिभाषितभाष्याब्धेः शब्दकौस्तु
भ उद्धृतः॥ तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते॥१॥ उद्धृत इत्यत्रास्माभिरिति शेषः॥ भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युक्तिस्तु शब्द
कौस्तुभोक्तार्थानामाधुनिकोत्प्रेक्षितत्वनिरासाय॥ अन्यथा तन्मूलकस्यास्य ग्रंथस्याप्याधुनिकोत्प्रेक्षितसारत्वापत्तौ पाणिनीयाना
मनुपादेयतापत्तेः॥ तत्र निर्णीत इत्युक्तिरितोप्यधिकजिज्ञासुभिः शब्दकौस्तुभे द्रष्टव्यमिति ध्वनयितुं॥ प्रतिज्ञातमाह॥ फलव्या
पारयोर्द्धातुराश्रये तु तिङः स्मृताः॥ फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणं॥२॥ धातुरित्यत्र स्मृत इति वचनविपरिणामेनान्वयः।
फलव्यापारौ धातुवाच्यावित्यर्थः॥ फलं विक्लित्त्यादि व्यापारस्तु भावनाभिधा साध्यत्वेनाभिधीयमाना क्रिया॥ उक्तं च वाक्यपदीये
॥ यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते॥ आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते इति॥ न च साध्यत्वेनाभिधाने मानाभाव
ः। पचति पाकं करोति कृतिरित्यादौ धात्वर्थावगमाविशेषे विक्रियाकांक्षानाकांक्षयोर्दर्शनेन स्यैवमानत्वात्॥ तथा च क्रियांतराकां
क्षानुत्थापकतावच्छेदकरूपं साध्यत्वं॥ तद्रूपत्वमसत्त्वभूतत्वं॥ एतदेवादाय असत्त्वभूतो भावश्च तिङ्पदैरभिधीयत इति वाक्यपदी

वं १ नद्या २ श्री

शिव० १

यत्निति द्रष्टव्यं। स्वयं च व्यापारः फूत्कारत्वाधःसंतापनत्वयत्नत्वादि तत्तद्रूपेण वाच्यः। पचतीत्यादौ तत्तत्प्रकारकबोधस्यानुभवसिद्धत्वात्। नच
नानार्थतापत्तिः। तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामननुगम[illegible]कस्य सत्त्वात्। आख्याते क्रियेकत्वव्यवस्थाप्यवच्छेदकं बुद्धि
विशेषैकमादायैव। उक्तं च वाक्यपदीये॥ गुणभूतैरवयवैः समूहः क्रमजन्मनां॥ बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यत इति॥ धात्वर्थं
निरूप्य तिङर्थमाह॥ आश्रये त्विति। फलाश्रये व्यापाराश्रये चेत्यर्थः। फलाश्रयः कर्म। व्यापाराश्रयः कर्त्ता। तत्र फलव्यापारयोर्धातुलभ्य
त्वान्न तिङ्-स्तदंशे शक्तिरनन्यलभ्यत्वात्। शक्यतावच्छेदकं चाश्रयत्वं तच्च शक्तिविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते। ननु नयोराख्यातार्थत्वे
किं मानं। प्रतीतेर्लक्षणया वाक्षेपाद्वा संभवादिति चेत्। अत्रोच्यते। लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रमेव मानं। अत्र हि चकारात्कर्त्त
रि कृदिति सूत्रोक्तं कर्त्तरीत्यनुकृष्यते। बोधकतारूपां तिबादिशक्तिं नत्स्यानित्वेन कल्पितेल्लकारे च कल्प्य लकाराः कर्मणि विधीयन्ते।
नकारविसर्गौ निष्ठां कर्मकरणादिबोधकशक्तिमादायशासादिविधानवत्। नच सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे। तथा च कर्तृत्वं कृतिः
कर्मत्वं च फलमेवार्थोऽस्त्विति शंक्यं। फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य पुनस्तत्र शक्तिकल्पनायोगात्॥ अथ दर्शनांतररीत्या व्या
पारस्य धात्वर्थताभावात्तत्र लकारविधिः स्यादिति चेन्न हि कृता भविकर्तृकर्मादिवाचित्वं न सिध्येत्। कर्तरि कृदिति च लः कर्मणीत्यनेन
न तुल्ययोगक्षेमं। अपि च। मीमांसकानां कृतामिवाख्यातानामपि कर्त्रवाचित्वमस्तु। भावनाया एवाक्षेपेण कृदादिवत्प्रतीतिसंभवे
वाच्यत्वं मास्तु तथा सति धात्वर्थं न स्यादिति चेन्न॥ घटमानयेत्यादावाक्षेपेऽपि तद्वाक्ये रपि धात्वर्थवदुपपत्तेः। पचतीत्यादौ भावना

दि ५

म २

ल-वै०भू०

२

2

याविवरणादर्शनाद्दुष्टत्वमिति चेन्न। पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वाविशेषात्। न च कर्तुर्विवरणं तात्पर्यार्थे विवरणं। पा
कं करोतीत्यत्र शाब्दार्थैकमेव विवरणवदितरेतरयोगद्वन्द्वे साहित्यांशविवरणवद्वा न तदर्थनिर्णायकमिति वाच्यं। भावनायामपि तुल्यत्वात्। किंच।
पचति देवदत्त इत्यत्राभेदान्वयदर्शनात्कर्तुर्वाच्यत्वमावश्यकं। पक्ता देवदत्त इतिवत्। न चाभेदबोधे समानविभक्तिकत्वं नियामकं तच्चात्र ना
स्तीति वाच्यं। सोमेन यजेत स्तोकं पचति राजपुरुष इत्यादावप्यभेदबोधानापत्तेः। न च लक्षणया कर्तुरुक्तत्वात्सामानाधिकरण्यं। पिंगाक्ष्या ३
वाचक ५ दियौगिकानामपि द्रव्यत्वानापत्तेः। एवं वैश्वदेवीत्यादितद्धितानामपि। अनेकमन्यपदार्थे साऽस्य देवतेत्यनुशासनेनापि पिंगेः। क्षि
णीयस्या विश्वेदेवा देवता अस्या इति विग्रहदर्शनात् प्रधानषष्ठ्यर्थ एवानुशासनलाभात्। तथा चारुणया पिंगाक्ष्यैकहायन्या सो
मं क्रीणातीति वाक्ये द्रव्यानुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्य एवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तेः। द्रव्य[illegible]वाचकत्वसा
तं धकमूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्योपपत्तेरिति प्रपंचितं वैयाकरणभूषणे। तिङ् इति। बोधकतारूपा शक्तिस्तिङ्क्ष्वेवे
त्यभिप्रेत्येदं। पदार्थं निरूप्य वाक्यार्थं निरूपयति। फलेत्यादि। विक्लित्त्यादिः फलं प्रति। तिङर्थः कर्तृकर्म[illegible] संख्याकालाः। त
त्र कर्तृकर्मणी व्यापारफलयोर्विशेषणे। संख्या कर्तृप्रत्यये कर्तरि। कर्मप्रत्यये कर्मणि। समानप्रत्ययोपात्तत्वात्। तथा चाख्या
आख्यातजन्य २ तार्थसंख्याप्रकारकशाब्दबोधं प्रति कर्तृकर्मोपस्थितिर्हेतुरिति कार्यकारणभावः फलितः। नैयायिकादीनामाख्यातार्थ
संख्यायाः प्रथमान्तार्थ एवान्वयदर्शनात् आख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तप[illegible]दजन्योपस्थितिर्हेतुरिति कार्य राम०

२

६२ कारणाभावो वाच्यः। सोपि चंद्र इव मुखं दृश्यते देवदत्तो भुक्त्वा व्रजतीत्यादौ चंद्रक्त्वार्थयोराख्याततार्थोनन्वयादित्यविशेषणांघटित इत्य त्य२
तिगौरवं॥ इममपि कर्तृकर्मणोराख्याततार्थत्वे मानमिति स्पष्टं भूषणे। कालस्तु व्यापारे विशेषणं। न याहि। वर्त्तमाने इत्यधिकाराद्धात्तोरि
तिलब्धं। तच्च धात्वर्थे वद्धत्वाधान्याद्व्यापारमेव ग्राहयतीति तत्रैव तदन्वयः। नच संख्यावत् कर्तृकर्मणोरेवान्वयः शंक्यः। अतीतभाव तद३
नाकेऽकर्तरि पचतीत्यापत्तेः। अपाक्षीदित्यनापत्तेश्च। पाकानारंभदशायां कर्तृसत्वे पक्ष्यतीत्यापत्तेश्च। नापि फलेतदन्वयः। फलानुत्पत्ति ना४
दशायां व्यापारसत्वे पचतीत्यनापत्तेः। पक्ष्यतीत्यापत्तेश्चेत्यवधेयं। नचामवातजड़ीकृतकलेवरस्योत्थानाननुकूल्येप्यसत्वात्तदुत्तिष्ठतीति
प्रयोगापत्तिः परयत्नस्याज्ञानाद्प्रयोगात्॥ किंचिच्चेष्टादितावगतेर्वायमुत्तिष्ठति शंकाभावात्फलं नजातमिति लोकप्रतीतेरिष्
त्वात्॥ एवं च तिङर्थो विशेषणमेव। भावनैव प्रधानं। यद्यपि प्रकृतिप्रत्ययौ सहार्थं ब्रूतः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं तथापि भावप्र या५
धानमाख्यातं सत्वप्रधानानि नामानीति निरुक्तात् भूवादिसूत्रस्थभाष्याच्च धात्वर्थभावस्य प्राधान्यमध्यवसीयते। अपि चाख्या ना५
तार्थप्राधान्ये तस्य देवदत्तादिभिः समभि[व्या]हारे दान्वयात्प्रथमांतस्य प्राधान्यापत्तिः। तथा च पश्य मृगो धावतीत्यत्र भाष्यसिद्धैकवा
क्यतानस्यात्। प्रथमांतस्य मृगस्य धावनक्रियाविशेष्यस्य दृशिक्रियायां कर्मत्वापत्तौ द्वितीयापत्तेः। न चैवमप्रथमासामाना ण२
धिकरण्यापत्तेरप्रसंग इति वाच्यं। एवमपि द्वितीयाया दुर्वारत्वेन पश्य मृग इति वाक्यस्यैवासंभवापत्तेः। नच पश्येत्यत्र
तमिति कर्माध्याहार्यं। वाक्यभेदप्रसंगात्॥ उक्तरीत्या धावनक्रियाविशेषस्यैव दर्शनकर्मतायामन्वयस्य प्रतिपिपादयिषित

त्वात् अध्याहारः तन्त्वयापत्तेश्च। एवं च भावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तं नादरणीयं।
३ क्रू किंतु आख्यातार्थकर्तृप्रकारकबोधे धातुजन्योपस्थितिर्भावनात्वावच्छिन्नविषयतया कारणमिति कार्यकारणभावो द्रष्टव्यः। भावना
प्रकारकबोधं प्रति तु कृज्जन्योपस्थितिवद्धात्वर्थभावनोपस्थितिरपि हेतुः। पश्य मृगो धावति पचति भवतीत्यादौ तु रोधेनेति दिक्।
3 इत्थं च पचतीत्यत्रैकाश्रयिका पाकानुकूला भावना। पच्यत इत्यत्रैकाश्रयिका या विक्लित्तिः तदनुकूला भावनेति बोधः। देवदे
त्तादिपदप्रयोगे तु आख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः। घटो नश्यतीत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्या
पार इति बोधः। स च व्यापारः प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानं। अत एव तस्यां सत्यां नश्यति नष्टस्य येन नष्टः
धा६ तद्भावित्वेन नङ्क्ष्यतीति प्रयोगः। देवदत्तो जानातीत्यादौ च देवदत्ताभिन्नाश्रयको ज्ञानेऽनुकूलो वर्तमानो व्यापार इ
ति बोधः। सर्वत्र तत्राश्रयतेवेति रीत्योह्यं॥२॥ नन्वाख्यातस्य कर्तृकर्मशक्तत्वे पचतीत्यत्रोभयबोधापत्तिः। कर्तृमात्रबोध धा६
वत्कर्ममात्रस्यापि बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह॥ फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः॥ व्यापारे शप्
श्नमाद्यास्तु द्योतयंत्याश्रयान्वयं॥३॥ तङादयः फलेश्वाश्रयान्वयं द्योतयंति। फलाश्रयस्य कर्मत्वात् द्योतकाः। व्यापा कर्मद्योतकाः ३
राश्रयस्य कर्तृत्वात् द्योतकाः कर्तृद्योतका इति समुदायार्थः। द्योतयंति तात्पर्यग्राहयंति॥३॥ नन्वेवं कमादमुनार शिवः
द इत्यबोधि स इत्यादौ पच्यते ओदनः स्वयमेवेत्यादौ च व्यभिचारः। कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे सति क
३